४,४,६ । "अस्य घावीर ईवतोऽग्नेरीशीत मर्त्यः" ऋ० ४,१५,५ "मक्षू हिष्मा गच्छथ ईवतो द्यून्" ऋ०४,४३,२ "प्राय वसुभ्य ईवदानमोवः" ऋ०५,४९,५ "जनाय चिद्य ईवत उ लोकं चकार" ऋ० ६,६३,२ । "उपश्रोतास ईवतोवचांसि" ऋ० ७,२३,१ । लोके तु ईमानित्येव स्त्रियां ङीप् ।

**ईश** ऐश्वर्य्ये अदा०आत्म० सक०सेट् । १ईष्टे, ईशिषे ईशिध्वे ऐशिष्ट । ईशाम्-बभूव आस चक्रे । ईशिता ईशिषीष्ट ईशिष्यते ऐशिष्यत । ईशनम् ईशिता । ईशितः । ईशा । ईशित्वा । "धनानामीशते यज्ञाः" । "यदीशिषे त्वं न मयि-स्थिते च" भट्टिः । "पुरुषोवै पशूनामैन्द्रस्तस्मात् पशूना-मीष्टे" शत० ब्रा० ४,५,५,७ । एतद्योगे कर्म्मणः सम्ब-न्धत्व विवक्षायां षष्ठी । वेदे तु क्वचित् णिचि न आसु । "सहस्र एषां पितरश्च नेशिरे" ऋ० १०,५६,७ । ता-च्छील्ये चानश् ईशानः ।

**ईश्** त्रि० ईश-क्विप् । ईश्वरे "ईशावास्यमिदं सर्वम्" यजु० ४०,१, "नमो देवेभ्यो नम ईश एषां कृतं चिदेनोमनमा विवासे" ऋ०६,४१,८ । "स देवानामीशां पर्य्येतु स ईशा-नोऽभवत्" अथ० १५,१,५ । "सह एवेशामारण्यानां पशूनामवरुन्धे" शत० ब्रा०१२,७,२,८ ।

**ईश** पु०ईश-क । १ईश्वरे "वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योप-तस्थिरे" कुमा० "वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्र-मे" माधवः "इत्थं क्षितीशेन वसिष्ठधेनुः" रघुः १परमे-श्वरे पु० । "लोकेश ! चैतन्यमयादिदेव !" प्रातः कृत्ये पुरा० । "ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रमत्" न्यायचर्चेयमीशस्य मननव्यपदेशभाक्" कुसुमा० । २महादेवे । "ब्रह्माच्युतेशार्कवनस्पतीनाम्" "स्वमन्त्रतो-होमचतुष्टचं स्यात्" हेमा० मत्स्यपु० । मल० त० "ब्रह्माच्युशानवनस्पतीनामिति"पाठः । रुद्रसंख्यातुल्यसं-ख्याकत्वात् ४एकादशसंख्यायाम् । "तारोमाया वर्म्मबीज-श्चण्डीशस्वरान्विता" तन्त्रसारे त्वरितामन्त्रोद्धारे ईशस्वर एकादशस्वर एकार इति कृष्णा० ५तद्दैवत्ये आर्द्रानक्षत्रे च । "नेशेज्याग्निविशाखवाय्वहिमघायास्यैः" राजमा० ।

**ईशकोण** पु० ईशस्वामिकः कोणः । पूर्वोत्तरायां विदिशि ईशदिगादयोऽप्यत्र । तत्कोणस्य ईशाधिदेवत्वात् तथात्वम् । "इन्द्रोवह्निः पितृपतिर्नैरृतोवरुणोमरुत् । कुवेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्तेस्तथात्वम् । इन्द्रस्य तेस्तदोशत्वं यात्राद्यर्थतया'ज्योति०उक्तम् । "सूर्य्यः शुक्रः क्षमापुत्रःसैंहिकेयःशनिः शशी । सौम्यस्त्रिदशमन्त्री च पूर्व्वादिकदिगीश्वरा" इति निरूप्य "दिगीशाहे शुभा यात्रा पृष्ठाहे मरणं ध्रुवमिति"तद्विपरीतदिशि यात्रा निषिद्धा ।

**ईशन** न०ईश-भावे ल्युट् । ऐश्वर्य्ये "य ईशेऽस्य जगतोनित्य-मेव नान्योहेतुर्विद्यत ईशनाय" श्वेताश्व० उ० । ईशे ईष्टे इत्यर्थः । "सर्पिष ईशनमत्र न समासः" सि०कौ० ।

**ईशपुरी** स्त्री ६त० । काश्याम् ईशनगर्य्यादयोऽप्यत्र ।

**ईशबल** न० ईशकृतं बलम् । पाशुपतमतसिद्धे पाशुपतानां द्वितीये पाशे "तासां माहेश्वरी शक्तिः सर्व्वानुग्राहिका शिवा । धर्मानुवर्तनादेव पाश इत्युपचर्य्यते" इत्युक्तबले पाशुपतशब्दे विवृतिः ।

**ईशसख** पु० ६त० टच्समा० । कुवेरे । बहु० न टच् । ईशसखा इत्येव । ईशमित्रादयोऽप्यत्र । ईशेन यथा ऽस्य सख्यं तथा भारते वर्णितं यथा । "पिता-महो रावणस्य साक्षाद्देवः प्रजापतिः । स्वयम्भुः सर्व-लोकानां प्रभुः स्रष्टा महातपाः । पुलस्त्यो नाम तस्या-सीन्मानसोदयितः सुतः । तस्य वैश्रवणो नाम गवि पुत्रो-ऽभवत् प्रभुः । पितरं स समुत्सृज्य पितामहमुपस्थितः । तस्य कोपात् पिता राजन् ! ससर्ज्जात्मानमात्मना । स जज्ञे विश्रवा नाम तस्यात्मार्द्धेन वै द्विजः । प्रतीकाराय स-क्रोधस्ततो वैश्रवणस्य वै । पितामहस्तु प्रीतात्मा ददौ वै-श्रवणस्य ह । अमरत्वं धनेशत्वं लोकपालत्वमेव च । ईशानेन तथा सख्यं पुत्रञ्च नलकूवरम् । राजधानीं नि-वेशञ्च लङ्कां रक्षोगणान्विताम् । विमानं पुष्पकं नाम कामगञ्च ददौ प्रभुः । यक्षाणामाधिपत्यञ्च राजराजत्वमेव च" भा०व० २७२अ० ।

**ईशा** स्त्री ईश-अ । १ऐश्वर्य्ये । "ईशायै मन्युं राजानं बर्हिषि-दधुरिन्द्रियम्" यजु० २१,५७ । "ईशायै ईशनमीशा" वेददी० ईष्टे ईश-क । २ऐश्वर्य्यान्वितायां स्त्रियां ३दुर्गायां च । ईशस्य पत्नीत्यर्थे तु ङीप् । ईशी ईशपत्न्यां दुर्गायाम् ।

**ईशान** त्रि० ईश-ताच्छील्ये चानश् । १ऐश्वर्य्यशीले २रुद्रमू-र्तिभेदे पु० । "तमीशानं जगतस्तस्थुषस्पतिम्" ऋ० १,८९,५ । "ईशानसंदर्शनलालसानाम्" कुमा० ३तद्दैवताके आर्द्रान-क्षत्रे तत्तुल्यसंख्यायाम् ४एकादशसंख्यायाम् । शिवस्य अ-ष्टसु मूर्तिषु सूर्य्यमूर्तिरूपतया पूज्ये ५शिवमूर्तिभेदे अष्टौ मूर्त्तीरभिधाय "मूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादि-क्रमयोगतः । आग्नेय्यन्ताः प्रपूज्यास्तु वेद्यां लिङ्गे शिवं यजेत्" ति०त० भविष्य पु० ।